कुलयोः शोकमावहेयुररक्षिताः । इमं हि सर्ववर्णानां पश्यन्तो धर्ममुत्तमम् । यतन्ते रक्षितुं भार्य्यां भर्त्तारो दुर्बला अपि । स्वां प्रसूतिं चरित्रञ्च कुलमात्मानमेव च । स्वधर्मं हि प्रयत्नेन जायां रक्षन् हि रक्षितः” इति । द्वयोः कुलयोः भर्तृपितृकुलयोः । अनेन कुलद्वयहन्तृभिरपि रक्ष्या इति शोककथनमुखेन दर्शितम् । अतएव बृहस्पतिः “सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यो निवार्य्या स्त्री स्वबन्धुभिः । श्वश्र्वादिभिः पालनीया गुरुस्त्रीभिर्दिवानिशम्” । मनुरपि “कालेऽदाता पिता वाच्यो वाच्यश्चानुपयन् पतिः । मृते भर्त्तरि पुत्त्रस्तु वाच्यो मातुररक्षिता” इति । काले कन्यादानयोग्ये काले । वाच्यो निन्द्यः । अनुपयन् अनुगच्छन् । स एव “पिता रक्षति कौमारे भर्त्ता रक्षति यौवने । पुत्त्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति” । याज्ञवल्क्योऽपि “रक्षेत् कन्यां पिता, विन्नां पतिः, पुत्त्रस्तु वार्द्धके । अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित् स्त्रियाः” इति । विन्ना विवाहिता । पतिपुत्त्रविहीनायास्तु रक्षणं पतिपक्षान्तर्गतेन प्रत्यासन्नेन कार्य्यम् । तथा च नारदः “मृते भर्त्तर्य्यपुत्त्रायाः पतिपक्षः प्रभुः स्त्रियः । विनियोगात्मरक्षासु भरणेषु च ईश्वरः । परिक्षीणे पतिकुले निर्मनुष्ये निराश्रये । तत्सपिण्डेषु चासत्सु पितृपक्षः प्रभुः स्त्रियः” । पितृपक्षस्याप्यभावे स एवाह “पक्षद्वयावसाने तु राजा भर्त्ता स्मृतः स्त्रियः । स तस्या भरणं कुर्य्यान्निगृह्णीयात् पथश्च्युताम्” इति । विनियोगः कर्म्मणि नियोजनम् । भर्त्ता पोषकः स्त्रीस्वभावं दर्शयति दक्षः “जलौकावत् स्त्रियः सर्व्वा भूषणाच्छादनाशनैः । सुहृतापि कृता नित्यं पुरुषं ह्यपकर्षति । जलौका रक्तमादत्ते केवलं सा तपस्विनी । इतरा तु धनं वित्तं मांसं वीर्य्यं बलं सुखम् । साशङ्का बालभावे तु यौवनेऽभिमुखी भवेत् । तृणवन्मन्यते नारी वृद्धभावे स्वकं पतिम् । स्वकार्य्ये वर्त्तमाना सा स्नेहाच्च निवारिता । अपथ्या तु भवेत् पश्चाद् यथा व्याधिरुपेक्षितः” इति । सुहृता तृप्ता कृतापीत्यन्वयः । अपकर्षति सततमाज्ञाभावं करोति स्वकार्य्ये स्वेच्छाचाम् । अपथ्या अत्यन्ताहितहेतुभूता । मनुरपि “नैता रूपं परीक्षन्ते नासां वयसि संस्थितिः । सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते । पौंश्चल्याच्चलचित्तत्वात् नैःस्नेह्याच्च स्वभावतः । रक्षिता यत्नतोऽपीह भर्तृ-

ष्वेता विकुर्व्वते । शय्यासनमलङ्कारं कामं क्रोधमनार्जवम् । द्रोहभावं कुचर्य्याञ्च स्त्रीभ्यो मनुरकल्पयत् । नास्ति स्त्रीणां क्रिया मन्त्रैरिति धर्म्मो व्यवस्थितः । निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृतमिति स्थितिः । तथा च श्रुतयो बह्व्यो निगीता निगमेष्वपि । स्वालक्षण्यपरीक्षार्थं तासां शृणुत निष्कृतीः । यन्मे माता प्रलुलुभे विचरन्त्यपतिव्रता । तन्मे रेतः पिता वृङ्क्तामित्यस्यैतन्निदर्शनम् । ध्यायत्यनिष्टं यत्किञ्चित् पाणिग्राहस्य चेतसा । तस्यैष व्यभिचारस्य निह्नवः सम्यगुच्यते । एवं स्वभावं ज्ञात्वाऽऽसां प्रजापतिनिसर्गजम् । परमं यत्नमातिष्ठेत् पुरुषो रक्षणं प्रति” इति । निरिन्द्रिया निर्वीर्य्या धैर्य्यप्रज्ञादिरहिता इति यावत् । स्त्रियोऽनृतमिति प्रायशोऽनृतवदनशीलत्वादुच्यन्ते । श्रुतयः श्रुतिवाक्यानि । निगमेषु वेदेषु स्वालक्षण्यं स्वरूपं तासां श्रुतीनां मध्ये या निष्कृतिरूपा व्यभिचारप्रायश्चित्तरूपास्ताः श्रुतीः शृणुत स्त्रीस्वभावज्ञानार्थमित्यर्थः । महाभारतेऽपि “कुलीना रूपवत्यश्च नाथवत्यश्च योषितः । मर्य्यादासु न तिष्ठन्ति स दोषः स्त्रीषु नारद ! । अनर्थित्वान्मनुष्याणां भयात् परिजनस्य च । मर्य्यादायाममर्य्यादाः स्त्रियस्तिष्ठन्ति भर्तृषु । यौवने वर्त्तमानानां मृष्टाभरणवाससाम् । नारीणां स्वैरवृत्तीनां स्पृहयन्ति कुलस्त्रियः । यदि पुंसां गतिर्ब्रह्मन् ! कथञ्चिन्नोपपद्यते । अन्योन्यञ्च प्रवर्त्तन्ते न च तिष्ठन्ति भर्तृषु । अलाभात् पुरुषाणाञ्च भयात् परिजनस्य च । वधबन्धभयाच्चैव स्वयं गुप्ता भवन्ति ताः । नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः । नान्तकः सर्व्वभूतानां न पुंसां वामलोचना । कामानामपि दातारं दातारं मानसान्त्वयोः । रक्षितारञ्च मृष्यन्ति भर्त्तारं यत्नतः स्त्रियः” इति । श्रीरामायणेऽपि “नैवाङ्गनानान्दयितो नापि द्वेष्योऽस्ति कश्चन । सर्व्वमेवावलम्बन्ते लता गहनजा इवेति” । अथ रक्षणप्रकारः । तत्र मनुः “न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुम् । एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुम्” इति । प्रसह्य आक्रम्य अवरुध्येति यावत् । यद्यप्यवरोधेन शरीरव्यभिचाराद्रक्षणं शक्यन्तथापि मानसव्यभिचाराद्रक्षणमशक्यमित्याशयेन मनुना न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुमित्युक्तम् । न च मानसव्यभिचाराद्रक्षणमनर्थकमन्यजत्वाभावेन प्रजाविशुद्धिविघाताभावादिति वक्तव्यम् । यत आह म-